# ॥ शालग्रामस्तोत्रम् ॥

.. shAlagrAmastotram ..

sanskritdocuments.org

July 26, 2016

# Document Information

Text title : shAlagrAmastotram
File name : shAlagrAmastotram.itx
Category : kavacha
Location : doc_vishhnu
Author : Traditional
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : Nat Natarajan nat.natarajan at gmail.com
Proofread by : Nat Natarajan nat.natarajan at gmail.com, NA
Latest update : March 20, 2016
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

# ॥ शालग्रामस्तोत्रम् ॥

॥ अथ श्री शालग्रामस्तोत्रम् ॥

श्रीरामं सह लक्ष्मणं सकरुणं सीतान्वितं सात्त्विकं
वैदेहीमुखपद्मलुब्धमधुपं पौलस्त्वसंहारिणम् ।
वन्दे वन्द्यपदांबुजं सुरवरं भक्तानुकंपाकरं
शत्रुघेन हनूमता च भरतेनासेवितं राघवम् ॥ १॥

जयति जनकपुत्री लोकभर्त्री नितान्तं
जयति जयति रामः पुण्यपुञ्जस्वरूपः ।
जयति शुभगराशिर्लक्ष्मणो ज्ञानरूपो
जयति किल मनोज्ञा ब्रह्मजाता ह्ययोध्या ॥ २॥

अथ श्रीशालग्रामस्तोत्रप्रारम्भः ॥

ॐ अस्य श्रीशालग्रामस्तोत्रमन्त्रस्य श्री भगवानृषिः ॥

नारायणो देवता । अनुष्टुप् छन्दः ।
श्रीशालग्रामस्तोत्रमन्त्रजपे विनियोगः ॥

युधिष्ठिर उवाच ।
श्रीदेवता देवेश देवतार्चनमुत्तमम् । ??
तत्सर्वं श्रोतुमिच्छामि ब्रूहि मे पुरुषोत्तम ॥ १॥

श्रीभगवानुवाच ।
गण्डक्यां चोत्तरे तीरे गिरिराजस्य दक्षिणे ।
दशयोजनविस्तीर्णा महाक्षेत्रवसुन्धरा ॥ २॥

शालग्रामो भवेद्देवो देवी द्वारावती भवेत् ।
उभयोः सङ्गमो यत्र मुक्तिस्तत्र न संशयः ॥ ३॥

शालग्रामशिला यत्र यत्र द्वारावती शिला ।
उभयोः सङ्गमो यत्र मुक्तिस्तत्र च संशयः ॥ ४॥

आजन्मकृतपापानां प्रायश्चित्तं य इच्छति ।
शालग्रामशिलावारि पापहारि नमोऽस्तु ते ॥ ५॥

अकालमृत्युहरणं सर्वव्याधिविनाशनम् ।
विष्णोः पादोदकं पीत्वा शिरसा धारयाम्यहम् ॥ ६॥

शङ्खमध्ये स्थितं तोयं भ्रामितं केशवोपरि ।
अङ्गलग्नं मनुष्याणां ब्रह्महत्यादिकं दहेत् ॥ ७॥

स्नानोदकं पिबेन्नित्यं चक्राङ्कितशिलोद्भवम् ।
प्रक्षाल्य इति तत्तोयं ब्रह्महत्यां व्यपोहति ॥ ८॥

अग्निष्टोमसहस्राणि वाजपेयशतानि च ।
सम्यक् फलमवाप्नोति विष्णोर्नैवेद्यभक्षणात् ॥ ९॥

नैवेद्ययुक्तां तुलसी च मिश्रितां विशेषतः पादजलेन विष्णोः ।
योऽश्नाति नित्यं पुरतो मुरारेः प्राप्नोति यज्ञायुतकोटिपुण्यम् ॥ १०॥

खण्डिताः स्फुटिता भिन्ना अग्निदग्धास्तथैव च ।
शालग्रामशिला यत्र तत्र दोषो न विद्यते ॥ ११॥

न मन्त्रं पूजनं नैव न तीर्थं न च भावना ।
न स्तुतिर्नोपचारश्च शालग्राम शिलार्चने ॥ १२॥

ब्रह्महत्यादिकं पापं मनोवाक्कायसम्भवम् ।
शीघ्रं नश्यति तत्सर्वं शालग्रामशिलार्चनात् ॥ १३॥

नानावर्णमयं चैव नानाभोगेन वेष्टितम् ।
तथा वरप्रसादेन लक्ष्मीकान्तं वदाम्यहम् ॥ १४॥

नारायणोद्भवो देवश्चक्रमध्ये च कर्मणा ।
तथा वरप्रसादेन लक्ष्मीकान्तं वदाम्यहम् ॥ १५॥

कृष्णे शिलातले यत्र सूक्ष्मं चक्रं सुदृश्यते ।
सौभाग्यं सन्ततिं धत्ते सर्वसौख्यं ददाति च ॥ १६॥

वासुदेवस्य चिह्नानि दृष्ट्वा पापैः प्रमुच्यते ।
श्रीधरः सुकरे वामे हरिद्वर्णस्तु दृश्यते ॥ १७॥

वाराहरूपिणं देवं कूर्माङ्गैरपि चिह्नितम् ।
गोपदं तत्र दृश्येते वाराहं वामनं तथा ॥ १८॥

पीतवर्णस्तु देवानां रक्तवर्णं भयावहम् ।
नारसिंहो भवेद्देवो मोक्षदं च प्रकीर्तितम् ॥ १९॥

शङ्खचक्रगदा कूर्माः शङ्खो यत्र प्रदृश्यते ।
शङ्खवर्णस्य देवानां वामे देवस्य लक्षणम् ॥ २०॥

दामोदरं तथा स्थूलं मध्ये चक्रं प्रतिष्ठितम् ।
पूर्णद्वारेण सङ्कीर्णा पीतरेखा च दृश्यते ॥ २१॥

छत्राकारे भवेद्राज्यं वर्तुले च महाश्रियः ।
चपटे च महादुःखं शूलाग्रे तु रणं ध्रुवम् ॥ २२॥

ललाटे शेष भोगस्तु शिरोपरि सुकाञ्चनम् ।
चक्रकाञ्चननवर्णानां वामदेवस्य लक्षणम् ॥ २३॥

वामपार्श्वे च वै चक्रे कृष्णवर्णस्तु पिङ्गलम् ।
लक्ष्मीनृसिंहदेवानां पृथग्वर्णस्तु दृश्यते ॥ २४॥

लम्बोष्टे च दरिद्रं स्यात् पिङ्गले हानिरेव च ।
लग्नचक्रे भवेद्याधिर्विदारे मरणं ध्रुवम् ॥ २५॥

पादोदकं च निर्माल्यं मस्तके धारयेत्सदा ।
विष्णोर्दृष्टं भक्षितव्यं तुलसीदल मिश्रितम् ॥ २६॥

कल्पकोटिसहस्राणि वैकुण्ठे वसते सदा ।
शालग्रामशिलाबिन्दुर्हत्याकोटिविनाशनः ॥ २७॥

तस्मात्संपूजयेद् ध्यात्वा पूजितं चापि सर्वदा ।
शालग्रामशिलास्तोत्रं यः पठेच्च द्विजोत्तमः ॥ २८॥

स गच्छेत्परमं स्थानं यत्र लोकेश्वरो हरिः ।
सर्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति ॥ २९॥

दशावतारा देवानां पृथग्वर्णस्तु दृश्यते ।
ईप्सितं लभते राज्यं विष्णपूजामनुक्रमात् ॥ ३०॥

कोटयो ब्रह्महत्यानामगम्यागम्य कोटयः ।
ताः सर्वा नाशमायान्ति विष्णुनैवेद्यभक्षणात् ॥ ३१॥

विष्णोः पादोदकं पीत्वा कोटिजन्माघनाशनम् ।
तस्मादष्टगुणं पापं भूमौ विनुनिपातनात् ॥ ३२॥

रघुवर ! यदभूस्त्वं तादृशो वायसस्य
प्रणत इति दयालुर्यस्य चैद्यस्य कृष्ण! ।
प्रतिभवमपराद्धुर्मुग्धसायुज्यदोभूर्-
वद किमु पदमागस्तस्य तेऽस्तिक्षमायाः ॥ १॥

मह्यं मनः फलमिदं मधुकैटभारे
मत्प्रार्थनीय मदनुग्रह एष एव ।
त्वद्भृत्यभृत्यपरिचारकभृत्यभृत्य-
भृत्यस्य भृत्य इति मां स्मर लोकनाथ ॥ २॥

इति श्री शालग्रामस्तोत्रं सम्पूर्णम् ॥

Proofread by Nat Natarajan, NA

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

.. shAlagrAmastotram ..
was typeset on July 26, 2016

Please send corrections to *sanskrit@cheerful.com*